आ.द्वि.से.-१४२६

२०२४-२६

# आचार्यपरीक्षायाम्

## द्वितीयाधिसत्रे ( द्वितीय सेमेस्टर )

## शाङ्करवेदान्तविषये

## द्वितीयप्रश्नपत्रम्

समयः- घण्टात्रयम् सम्पूर्णाङ्काः-१००

उत्तीर्णाङ्काः- ४८

### प्रथमो भागः

### ( व्याख्यात्मकः )

समानमानेषु द्वौ समाधेयौ - २०×२=४०

१ ) संक्षेपशारीरकग्रन्थे प्रवर्तकवाक्यादेव व्युत्पत्तिः इति भागं "वाक्यात् भूतार्थनिष्ठात् भवति" इत्यादि श्लोकाधारेण सुस्पष्टं प्रतिपाद्यताम्।

२ ) "सोऽयं देवदत्तः" इति वाक्यस्य अखण्डनिष्ठत्वं ग्रन्थदिशा स्पष्टयत।

३ ) स्वप्रकाशविषये भाट्टसम्मतिप्रदर्शनपुरस्सरं यथाग्रन्थं स्पष्टयत।

४ ) प्राभाकरं प्रत्याह इत्यारभ्य शब्दो गकार इति लौकिकमस्ति वाक्यं विस्पष्टमति च पदद्वयमत्र वाक्ये प्राभाकरे च समये न गकारमात्रादन्यत् पदद्वयनिगद्यमभीष्टमस्मिन् इति श्लोकार्थं स्पष्टयत्।

अ०पृ०द्र०

## द्वितीयो भागः
## ( टिप्पण्यात्मकः )

समानमानेषु द्वौ समाधेयौ- १५×२=३०

( १ ) आत्मनः औपनिषदत्वं ''ननु अज्ञेयमिदं'' इत्यादि कारिकया प्रतिप्रादितं स्पष्टयत ।

( २ ) लक्ष्यार्थ विचारं अत्राह वाच्यशबलन्वितं इत्यादि श्लोकोक्तं स्पष्टयत ।

( ३ ) अस्थूलादि वचोनिरस्तनिखिलद्वैतप्रपञ्च इत्यादि कारिकां पूरयित्वा अर्थं स्पष्टयत।

## तृतीयो भाग
## ( अतिलघूत्तरीयात्मकः )

३. संक्षेपेण समानमानाः सर्वे समाधेयाः - ३×१०=३०

( क ) संक्षेपशारीरिककर्ता कः ?

( ख ) अस्यां परीक्षायां कति श्लोकाः नियताः सन्तिः?

( ग ) अस्मिन् ग्रन्थे प्रतिपाद्यं वस्तु किम् ?

( घ ) कस्य वेदान्तस्य अयं ग्रन्थः ?

( ङ ) सर्वं शब्दान्तराणां नयनिपुणमतिः इत्यादि कारिकां पूरयत ।

( च ) अस्य ग्रन्थस्य मङ्गलश्लोकः कः ?

( छ ) अभिन्न निमित्तोपादानं इति कस्य मते ?

( ज ) लक्षणायाः बीजं किम् ?

( झ ) मोक्षः सिद्धः साध्यो वा ?

( ञ ) ब्रह्म नाम किम् ?